International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 87-91
© 2026 IJMH
www.themultijournal.com
Received: 18-05-2026
Accepted: 06-06-2026
Publish : 08-06-2026

**अम्बिका चौधुरी**
शोधच्छात्रा ,
डॉ. भीमराव-आम्बेडकर-विश्वविद्यालयः, आगरा

**मार्गनिर्देशकः –**
**प्रो. विजयश्रीवास्तवः**
प्राचार्यः, संस्कृतविभागः, राजा-बलवन्त-सिंह-महाविद्यालयः, आगरा (उ.प्र.)

**Correspondence:**
**अम्बिका चौधुरी**
शोधच्छात्रा ,
डॉ. भीमराव-आम्बेडकर-विश्वविद्यालयः, आगरा

# सांख्य-योगदर्शनयोः गुणतत्त्वानां विमर्शः

**अम्बिका चौधुरी, प्रो. विजयश्रीवास्तवः**

**सारसंक्षेपः**

भारतीयपरम्परायां विविधानि शास्त्राणि वर्तन्ते। तेषु शास्त्रेषु भारतीयदर्शनं अत्यन्तं प्रामुख्यं भजते। भारतीयदर्शनस्य परम्परा मानवजीवनस्य दुःखवृत्तिं परमपुरुषार्थं च आधारीकृत्य प्रवर्तते। एतस्यां परम्परायां सांख्ययोगदर्शनयोः विशिष्टं स्थानं वर्तते। उभयोः दर्शनयोः प्रकृतेः तत्त्वस्य मूलाधाररूपेण सत्त्वगुणः रजोगुणः तमोगुणः च एते त्रयः गुणाः विशेषतः विवेचिताः वर्तन्ते। सांख्ययोगदर्शनयोः मुख्यं तत्त्वं प्रकृतिः विद्यते , या मूलप्रकृतिः त्रिगुणात्मिका प्रतिपादिता वर्तते। एते त्रयः गुणाः सर्वेषां भौतिक-मानसिक-आध्यात्मिकप्रवृत्तीनां मूलकारणत्वेन भवन्ति। एतेषां गुणानां पृथक् पृथक् स्वभावः भवति , सत्त्वगुणः प्रकाशकः , रजोगुणः प्रवृत्त्यात्मकः , तमोगुणः आवरणात्मकः च एतेषां एतादृशः स्वभावः वर्तते। सांख्यदर्शने गुणानां वैषम्यात् महदादितत्त्वानां उत्पत्तिः निरूप्यते , योगदर्शने गुणत्रयस्य चित्ते प्रभावः स्पष्टः निरूपितोऽस्ति। गुणानां विवेचनेन ज्ञायते यत् सांख्ययोगदर्शनयोः गुणतत्त्वस्य साम्यता वैषम्यता च कीदृशी वर्तते। दर्शनयोः गुणतत्त्वस्य अध्ययनेन मानवजीवने कीदृशः स्वभावः वर्तते। अध्ययनस्य निष्कर्षत्वेन ज्ञातं यत् उभयोः दर्शनयोः विविधानि गुणतत्त्वानि विद्यन्ते यानि मानवजीवने अत्यन्तं प्रासङ्गिकतां भजन्ते अपि च मानवजीवनव्यवस्थायाः स्वरूपनिर्माणे तद्विकासे च अत्यन्तमुपयोगीनि वर्तन्ते।

**सूचकशब्दाः –** सांख्यदर्शनम्, योगदर्शनम्, गुणः, प्रकृतिः, पुरुषः, दुःखत्रयम् , चित्तवृत्तिः, अष्टाङ्गयोगाः, अध्ययनविधिश्च।

## भूमिका

अस्माकं भारतीयपरम्परायां विविधानि शास्त्राणि वर्तन्ते यथा - साहित्यशास्त्रं, व्याकरणशास्त्रं, दर्शनशास्त्रं, न्यायशास्त्रं, वेदशास्त्रञ्च एतेषु शास्त्रेषु अत्यन्तं महत्वपूर्णं भारतीयदर्शनशास्त्रं प्रामुख्यं भजते। भारतीयदर्शनं द्विविधं आस्तिकं नास्तिकञ्च वर्तते। आस्तिकदर्शनानि षट् सन्ति सांख्यदर्शनं योगदर्शनं न्यायदर्शनं वैशेषिकदर्शनं वेदान्तदर्शनं चादयः सन्ति। एतेषु दर्शनेषु अत्यन्तं प्राचीनदर्शनं सांख्यदर्शनं वर्तते। अस्य दर्शनस्य प्रवर्तकः कपिलमुनिः विद्यते। सांख्यदर्शनस्य आरम्भे दुःखत्रयस्य विषये उक्तमस्ति। अस्मिन् दर्शने विशेषरूपेण पञ्चविंशति-तत्त्वानां विशदरूपेण विवेचनं कृतम् अस्ति। प्रमुखरूपेण तत्त्वद्वयं प्रकृतिः पुरुषश्च अस्ति। अस्य दर्शनस्य प्रमुखः सिद्धान्तः सत्कार्यवादः अस्ति। अस्मिन्नेव दर्शने प्रकृतिः मूलाधाररूपेण वर्तते , एषा प्रकृतिः त्रिगुणात्मिका अस्ति । त्रयाणां गुणानां सत्वगुणः रजोगुणः तमोगुणश्च एतेषां विषये सम्यक् रूपेण बोधितमस्ति। एतेषां गुणानाम् अनुसारेण त्रयाणां दुःखानां आधिभौतिकं आध्यात्मिकं आधिदैविकं च दुःखानि भवन्ति। एतस्य पूरकं दर्शनं योगदर्शनं वतेते एतयोः अनेकाः समानताः सन्ति।

योगदर्शनमपि अत्यन्तं प्राचीनतमं विद्यते। एतस्य प्रवर्तकः भगवान् पतञ्जलिः वर्तते । एतस्य ग्रन्थः योगसूत्रं वर्तते अस्मिन् योगसूत्रे चत्वारः पादाः सन्ति। योगसूत्रस्य आदिमं सूत्रम् अथ योगानुशासनम् इति वर्तते। द्वितीये सूत्रे योगश्चित्तवृतिनिरोधं योगस्य लक्षणं दत्तमस्ति। योगदर्शने षड् विंशतिः तत्त्वानि विवेचितानि सन्ति।

## उद्देश्यानि

“प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते” अस्या उक्तेरनुसारं प्रयोजनरहिते कस्मिन्नपि कर्मणि मन्दजनोऽपि संलग्नो न भवति।

अतः शोधकार्यमिदं निम्नलिखितानि उद्देश्यानि अधिकृत्य विधास्यते-

- भारतीयदर्शनस्य सांख्यदर्शने गुणतत्त्वविमर्शः।
- भारतीयदर्शनस्य योगदर्शने गुणतत्त्वविमर्शः।
- सांख्य- योगदर्शनानुसारम् गुणविधीनां विमर्शः ।
- सांख्यदर्शने गुणानां कारणतत्त्वस्वरूपस्य विवेचनं तथा योगदर्शने गुणानां साधनात्मकं परिशीलनम् ।
- मानवचित्तवृत्तिषु गुणतत्त्वानां समीक्षणम् ।
- नैतिकजीवनविकासे गुणतत्त्वानां प्रासङ्गिकतायाः विवेचनम् ।
- सांख्ययोगदर्शनयोः विवेकज्ञानोदयेन गुणातीतावस्थायाः सिद्धिः तथा कैवल्यप्राप्तेः विषये समीक्षणम् ।
- योगाभ्यासेन त्रिगुणानां संतुलनप्रक्रियायाः समीक्षणम् ।
- सांख्य-योगदर्शनयोः गुणसिद्धान्तस्य आधुनिकजीवने व्यक्तित्व-विकासाय, आत्मनियन्त्रणाय, मानसिकस्वास्थ्यसंरक्षणाय च प्रासङ्गिकतां दर्शयितुम् ।

**अनुसन्धानविधिः**

प्रकृताध्ययनस्य प्रकृतिः दार्शनिकी भवति । अतः अनुसन्धानकार्यमिदं दार्शनिकमस्ति । एतत् अनुसन्धानकार्यं विषयविस्तार-दृष्ट्या गुणावत्तामूलकस्वभावयुक्तम् अस्ति । उपलब्धग्रन्थानां यथोचितमध्ययनं विश्लेषणं च कृत्वा युक्तियुक्तः शोधविश्लेषः सुसम्पन्नः भवति । अतः इदं कार्यं गुणात्मकं दार्शनिकमनुसन्धानं वर्तते । गुणात्मक-अध्ययन-संपादने विषयवस्तुविश्लेषणविधिः अत्यन्तम् उपयोगी भवति । अत्र प्रायसर्वत्र समीक्षात्मकविधिः लक्ष्यते ।

**सांख्यदर्शने गुणतत्त्वविचारः**

भारतीयदर्शनपरम्परायां सांख्यदर्शनं सर्वप्राचीनतमं दर्शनमस्ति। सम्यक् ख्यानं ज्ञानं इति संख्या । सम् उपसर्गपूर्वकं चक्षिङ्-ख्या धातोः आङ् प्रत्यये सांख्यशब्दस्य व्यत्पत्तिर्भवति । अमरकोषे विदुषः तथा पण्डितान् "संख्यवान्" इति उच्यते। चरकसंहितायां सांख्य शब्दस्य प्रयोगः प्रकृष्टज्ञानवान् इत्यर्थे दृश्यते। सांख्यदर्शने संख्याशब्दस्य विशेषं माहात्म्यमस्ति । संख्याशब्देन सांख्यदर्शने पञ्चविंशतितत्त्वानां ज्ञानमेव अभिधीयते । सांख्यदर्शने 'संख्या' शब्दस्य यथार्थताविचारे महाभारते उक्तं यत् -

**सांख्यदर्शनमेतावत् परिसंख्यानुदर्शनम् ।**
**सांख्याः प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ॥**
**तत्त्वानि च चतुर्विंशत् परिसंख्याय तत्त्वतः ।**
**सांख्याः सह प्रकृत्या तु निस्तत्त्वः पञ्चविंशकः ॥**[1]

सांख्यदर्शने पञ्चविंशतिः तत्त्वानि सन्ति। प्रकृतिः, महत्, अहंकारः, पञ्चतन्मात्राणि (रूप रस गन्ध स्पर्श शब्दाः), मनः, पञ्चज्ञानेन्द्रियाणि श्रोत्रम्, त्वक्, चक्षुः, रसना, नासिका), पञ्च कर्मेन्द्रियाणि (वाङ्, पाणिः, पादः, पायुः, उपस्थः), पञ्च महाभूतानि (पृथिवी, जलम्, तेजः, वायुः, आकाशः) पुरुषः (जीवात्मा)।

**"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥"**[2]

व्यक्त-अव्यक्त-ज्ञान-विज्ञानात् एव आध्यात्मिक-आधिदैविक-आधिभौतिकानां सर्वप्रकाराणां दुःखानां निवृत्तिः सम्भवति। पञ्चविंशति-तत्त्व-ज्ञानेन एव परमदुःखनिवृत्तिः सम्भवति। यतोऽत्र औषधसेवनं, यागयज्ञाः, पूजादीनि कर्माणि ऐकान्त्यतिकदुःखनिवृत्तिं कर्तुं समर्थानि सन्ति, परन्तु परमदुःखनिवृत्तिं कर्तुं न शक्नुवन्ति। अतः सांख्यकारिकायाम् उक्तम् — **"तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्"**[3] इति।

सांख्यदर्शने पञ्चविंशति-तत्त्वेषु द्वे मुख्ये तत्त्वे स्तः चेतनं पुरुषतत्त्वम् अचेतनं प्रकृतितत्त्वञ्च । एते द्वे तत्त्वे परस्परं स्वभावतोऽतीव भिन्ने। गुणत्रयातीतः चेतनः पुरुषः निर्विकारः, अप्रसवधर्मा च भवति। तद्विपरीता च जगदुत्पत्तेः मूलकारणं अचेतना मूलप्रकृतिः। सुख-दुःख-मोहरहितः पुमान् दुःखात्मिकायाः प्रकृतेः विषये ईश्वरकृष्णविरचितायां सांख्यकारिकायाम् एवं निरूपितम् —

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।**
**व्यक्तं तथा प्रधानम्, तद्विपरीतस्तथा च पुमान् ॥**[4]

तत्र मूलप्रकृतिः त्रिगुणात्मिका, अविवेकि, विषयरूपा, समान्या, अचेतना, प्रसवधर्मिणी इत्यादयः नामभिः अनेकैः शब्दैः विवेचयन्ते । मूलप्रकृतिः त्रिगुणात्मिका भवति । यथा सत्त्वगुण-रजोगुणा-तमोगुणाश्चेति। अस्य वाक्यस्य पुष्ठ्यर्थं श्वेताश्वतरोपनिषदि उक्तं यत्–

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥**[5]

पुरुषस्य बन्धनं कुर्वन्ति इति हेतोः ते गुणा इति कथ्यन्ते । गुणत्रयसम्बद्धो बद्धः पुरुषः मोक्षप्राप्तेः प्रतिबन्धकत्वेन निरूप्यते। यदि आत्मा स्वभावतः मलिनः, अस्वच्छः तथा विकारी स्यात्, तर्हि तस्य जन्मान्तरशतैरपि मोक्षः कदापि न स्यात् । तस्मिन् विषये कुर्मपुराणे उक्तं यत् -

**यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात् स्वभावः॥**
**न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि ॥**[6]

अतः मलिनता, विकारः च आत्मधर्मा न भवन्ति, अपि तु सत्त्व-रजस्-तमोगुणात्मकायाः प्रकृतेः एव धर्मा इति निष्पद्यते। सत्त्व-रजस्-तमोगुणैः सह पुरुषस्य संयोगात् बन्धस्य अनुभवः जायते, विवेकज्ञानोदये तु गुणानां प्रवृत्तिनिवृत्त्या आत्मनः स्वस्वरूपावस्थानं भवति । तस्मात् गुणत्रयातीतः शुद्धोऽविकारी च पुरुषः, सत्त्वम्, रजः तमश्चेति गुणाः यथासंख्यं प्रीति-अप्रीति-विषादस्वरूपाः भवन्ति । प्रीतिश्च, अप्रीतिश्च, विषादश्च प्रीत्यप्रीतिविषादाः । ते आत्मनः स्वरूपाणि येषां ते प्रीत्यप्रीतिविषादात्मकाः अर्थात् सत्त्वं सुखस्वरूपं, रजः दुःखस्वरूपं, तमः मोहस्वरूपमिति ।

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥**[7]

सत्त्वगुणः अतीव लघुः एवं प्रकाशकः अस्ति। रजोगुणः उपष्टम्भकः अर्थात् संश्लेषजनकः एवं चञ्चलः अस्ति। तमोगुणः गुरुः अर्थात्

भारयुक्तः तथा अवरोधकः अस्ति। परस्परविरुद्धानां एतेषां गुणत्रयाणां व्यापारः प्रदीपवत् सम्मिल्य एकप्रयोजनाय भवति।

**सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।**

**गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥**[8]

सत्त्वादिगुणानां मध्ये कश्चित् एको गुणः अन्यतमम् आश्रित्य समुत्पादयति । सर्वेऽपि गुणाः परस्परं मिलित्वैव सर्वकार्यजनकीभूता भवन्ति । पारस्परिकसहयोगेनैव महदादिकार्योत्पादकाः भवन्ति । मूलप्रकृतिः सदैव परिणामिनी भवति। सृष्टिचक्रस्य विचारप्रसङ्गे सांख्यकारिकायां प्रतिपाद्यते यत् -

**प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः ।**

**तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ।।**[9]

प्रलयकालेऽपि तस्याः परिणामः अव्याहतः एव वर्तते। यस्मिन् परिणामे प्रकृतेः स्वरूपभूतानां गुणत्रयाणां तारतम्याभावात् तत्त्वान्तरस्य प्रकाशः न जायते, सः परिणामः स्वरूपपरिणामः इति उच्यते । सृष्टिकाले प्रकृतेः स्वरूपभूतानां गुणत्रयाणां तारतम्येन यः परिणामः भवति, सः विरूपपरिणामः इत्याख्यायते । त्रिगुणात्मिकायाः मूलप्रकृतेः विकासक्रमे उत्पन्नेषु महदादिषु त्रयोविंशतितत्त्वेषु गुणत्रयस्य अनुवर्तनं अविच्छिन्नरूपेण परिलक्ष्यते।

**कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।**

**परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥**[10]

## योगदर्शने गुणतत्त्वविचारः

भारतीयज्ञानपरम्परायां पतञ्जलिमहर्षिकृतं योगदर्शनम् अत्यन्तं प्राचीनं, सुव्यवस्थितं च दर्शनं वर्तते । अस्य दर्शनस्य मूलग्रन्थः योगसूत्रम् इति सुप्रसिद्धं वर्तते, यस्मिन् चित्तवृत्तिनिरोधरूपस्य योगस्य तात्त्विकं, साधनात्मकं च स्वरूपं सूत्ररूपेण निगद्यते । योगदर्शनं सांख्यदर्शनस्य तत्त्वाधारं अधिकृत्य, पुरुष–प्रकृत्योः विवेकज्ञानोपलब्ध्या कैवल्यप्राप्तिः साध्यते इति स्वीक्रियते । सांख्यदर्शनस्य 'पूरकदर्शनम्' इति नाम्ना इदं दर्शनं सुप्रसिद्धमस्ति । अस्य दर्शनस्य मुख्यं लक्ष्यं मानवजीवनस्य परमं लक्ष्यं (मोक्षः) यस्मिन् मार्गे प्राप्तुं शक्नोति तत् दर्शयितुं भवति । योगशब्दः युज् समाधौ इति धातोः घञ् प्रत्यये निष्पन्नर्भवति । योगशब्दः गीतायाम् उपनिषत्सु च बहुस्थाने दृश्यते । भगवता श्रीकृष्णेन भगवद्गीतायां दुःखनिवृत्त्यर्थम् उपायत्वेन योगः उपदिष्टः । तथा कर्मसु कौशलरूपः योगः एव श्रेष्ठं कर्म भवतीति भगवतो वचनं यथा- **योगः कर्मसु कौशलम् इति**[11] । योगदर्शनमिदं पादचतुष्टये विभक्तमस्ति । ते यथा समाधिपादः (५१ सूत्राणि), साधनपादः (५५ सूत्राणि), विभूतिपादः (५५ सूत्राणि), कैवल्यपादश्चेति (३४ सूत्राणि)।

चतुष्पादात्मके योगदर्शने प्रथमपादः समाधिपादः भवति । शास्त्रारम्भे पतञ्जलिना कृतं प्रथमं सूत्रं भवति '**अथ योगानुशासनम्**'[12]। ननु योगस्यानुशासनप्रवृत्तौ को नाम योगः? इति जिज्ञासा जायते। तस्मादेव आचार्येण योगस्य लक्षणं प्रकटयितुं द्वितीयं सूत्रमुक्तं - '**योगश्चित्तवृत्तिनिरोधः**' इति[13]। चित्तस्य याः वृत्तयः भवन्ति तासां वृत्तीनां निरोधः एव योगः इति निगद्यते । ताः चित्तस्य वृत्तयः एवंविधाः प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः इति। तत्र सर्वासां वृत्तीनां निरोधे सति प्रथमेन सूत्रेण उक्तयोगशब्दस्य समाधिः इति यः अर्थः सः सिध्यति । तस्य साधनार्थम् अष्टौ अङ्गानि प्रयुक्तानि वर्तन्ते। तानि **यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि इति ।**[14] एते अष्टाङ्गाः साधकस्य शारीरिक–मानसिक–आध्यात्मिकशुद्धये क्रमशः उपकारकाः भवन्तिः, येन स समाधिं प्रति गच्छति , ननु सर्ववृत्तिनिरोधे तु असम्प्रज्ञातः तस्य चेदं लक्षणं, ततश्च योगः सर्वचित्तवृत्तिनिरोधिः इति वक्तव्यम् । न चोक्तम्। अतोऽव्याप्ति लक्षणमिति चेन्न यदि सर्वशब्दग्रहणं क्रियेत । तदैकदेशनिरोधनिमित्तस्य सम्प्रज्ञातस्य योगत्वं निवर्तितं भवति। तेन महर्षिव्यासेन भाष्ये उक्तम्- सर्वशब्दाग्रहणात् सम्प्रज्ञातोऽपि योग इत्याख्यायते इति । ननु किं पुनः चित्तं यस्य वृत्तिनिरोधो योग इति उच्यते, भाष्ये उक्तं यत्-

**चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्।**[15]

अत्र त्रिगुणमिति पदेन सत्त्वं रजः तमश्चेति त्रयो गुणाः निरूप्यन्ते । प्रख्या नाम प्रकाशनं, स च सत्त्वगुणस्य धर्मः, प्रवृत्तिः नाम प्रवर्तनं व्यापारः स हि रजोगुणस्य धर्मः, स्थितिः नाम स्थानं वरणं प्रतिबन्धः इति, स च तमोगुणस्य धर्मः। एवंशीला हि सत्त्वादयोः गुणाः, चित्तं च प्रख्यादिशील, तस्मात् त्रयाणां गुणानां परिणामश्चित्तं भवितुमर्हति । तस्मात् भाष्ये क्षिप्तभूमि दृश्यते प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टम् ऐश्वर्यविषयप्रियं भवति ।[16] पञ्चचित्तभूमिषु क्षिप्तभूमौ यदा सत्त्वगुणस्य अल्पता रजोगुणस्य च आधिक्यं दृश्यते, तदा चित्तम् ऐश्वर्यविषयप्रियं भवति । प्रीतिः रागः, ऐश्वर्यविषयरागयुक्ता वृत्तयो भवन्ति इत्यर्थः । एवं तमसानुबिद्धस्य रजोमलापेतस्य चित्तस्य अनेकाः वृत्तयो भवन्तीति बोद्धव्यम् । अपरिणामिनी अप्रतिसंक्रमा दर्शितविषया शुद्धा अनन्ता सत्त्वगुणात्मिका च चितिशक्तिः । अतः तस्यां विरक्तं चित्तं तामपि ख्याति निरुणद्धि । एतस्यां निरोधभूमौ यः समाधिः स निर्बीजः। एवं चित्तवृत्तीनां निरोध एव योग इति । तदेव तमसानुविद्धमधर्मा-ज्ञानावैराग्यानेश्वर्योपगं भवति । **तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति ।**[17]

योगदर्शने क्लिष्टाऽक्लिष्टाश्च भेदेन पञ्च चित्तवृत्तयः दृश्यन्ते । क्लेशहेतुकाः कर्माशय प्रचक्षेत्रीभूताः क्लिष्टाः , ख्यातिविषया गुणाधिकारविरधिन्योऽक्लिष्टाः। **क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः।**[18] ननु के के पञ्च चित्तवृत्तयः इति जिज्ञासायाः निवारणार्थं पातञ्जलयोगदर्शने उक्तं यत् - **प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः।**[19] सत्त्व-रजस्-तमस्-त्रिगुणयुक्ते मनुष्यदेहे गुणानां बहिः प्रकाशः तस्य कर्मव्यापारद्वारा प्रकट्यते। यथा ध्यान-पूजा-गुरुभक्त्यादिभिः साधनात्मककर्मभिः सत्त्वगुणस्य अभिव्यक्तिर्भवति। सर्वेषु कर्मसु प्रवृत्तिः च चाञ्चल्यं च रजोगुणात् एव जायते । तथा च कर्मणि प्रतिबन्धः, अवसादः आलस्यं च तमोगुणस्य अभिव्यक्तिलक्षणानि भवन्ति । केवलं जाग्रतावस्थायामेव न, अपि तु निद्राकालेऽपि

गुणत्रयस्य सूक्ष्मानुभवो भवति। जाग्रत्-स्वप्नयोः अभावे यस्याः वृत्तेः कारणेन सूक्ष्मज्ञानानुभवः जायते, सा एव 'निद्रा' इति उच्यते। **अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥**[20] **सा च सम्प्रबोधे प्रत्यवमर्शात् प्रत्ययविशेषः । कथं , सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशारदीकरोति ।**[21] निद्रायाः पश्चात् जाग्रतावस्थायां त्रिगुणानां तारतम्येन अनुभूतेः स्वरूपं भिन्नं वर्तते। **दुःखमहमस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थितम् । गाढं मूढोऽहमस्वप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तमलसं मुषितमिव तिष्ठतीति । स खल्वयं प्रबुद्धस्य प्रत्यवमर्शो न स्यादसति प्रत्ययानुभवे , तदाश्रिताः स्मृतयश्च तद्विषया न स्युः । तस्मात् प्रत्ययविशेषो निद्रा, सा च समाधावितरप्रत्ययवन्निरोद्धव्येति** ॥[22]

**निष्कर्षः**

भारतीयदर्शनपरम्परायां सांख्ययोगदर्शनयोः अत्यन्तं महत्त्वपूर्णं स्थानं विद्यते। उभयोः दर्शनयोः तात्त्विकमूलाधारः गुणतत्त्वेषु सत्त्व-रजस्,-तमस्-गुणाः निहिताः सन्ति । सांख्यदर्शने गुणाः प्रकृतेः स्वभावभूताः कारणतत्त्वत्वेन विवेच्यन्ते, योगदर्शने तु ते एव गुणाः चित्तवृत्तिनिरोधस्य साधनरूपेण प्रयुज्यन्ते । अतः गुणतत्त्वानां विवेचनं न केवलं तात्त्विकं, अपि तु साधनात्मकत्वेन उपपद्यते । सांख्यदर्शने त्रिगुणात्मकप्रकृतेः विकाररूपेण समस्तजगतः प्रवृत्तिः निरूप्यते, यत्र गुणातीतः पुरुषः साक्षिरूपेण प्रतिष्ठितः भवति। योगदर्शने च एतेषां गुणानां वैषम्येन चित्तस्य बहिर्मुखता, समत्वेन चित्तप्रसादः, तथा च गुणातीतावस्थायां कैवल्यप्राप्तिः प्रतिपाद्यते । उभयोः दर्शनयोः गुणतत्त्वविचारः मोक्षमार्गस्य स्पष्टतया निर्देशनं करोति।

अध्ययनपरिणामतः निम्नलिखिताः निष्कर्षाः प्राप्यन्ते—

- सांख्ययोगदर्शनयोः गुणतत्त्वानां शिक्षाद्वारा मनुष्यः आत्मानुभूतिं कर्तुमर्हति ।
- सर्वेषां गुणानां यथोचितपालनेन मनुष्याः सर्वेभ्यः पापेभ्यः कष्टेभ्यश्च आत्मानं रक्षितुमर्हति ।
- सांख्ययोगदर्शनयोः गुणतत्त्वानां ज्ञानद्वारा मानवे निम्नोक्तगुणानां विकासः परमावश्यकः भवति। यथा— भयस्य सर्वथा अभावः, अन्तःकरणस्य पूर्णनिर्मलता, तत्त्वज्ञानाय ध्यानयोगे निरन्तरदृढस्थितिः, इन्द्रियाणां नियन्त्रणम्, गुरुदेवतादीनां पूजनम्, उत्तमकर्मणाम् आचरणम्, वेदादिशास्त्राणां पठनाभ्यासः अथवा स्वाध्यायप्रवृत्तिः, व्यवहारस्य सरलता चेति।
- एवञ्च मनसा वाचा कर्मणा च अहिंसापालनम्, यथार्थप्रियभाषणम्, क्रोधस्य सर्वथा परित्यागः, अहङ्कारभावस्य त्यागः, चित्तचञ्चलतायाः अभावः, कस्यचिदपि निन्दनस्य अभावः, सर्वेषु प्राणिषु दयाभावः, इन्द्रियाणां विषयैः सह संयोगे सत्यपि आसक्त्यभावः, शास्त्रविरुद्धे लोकविरुद्धे च कर्मणि लज्जा, व्यर्थचेष्टानाम् अभावः— इत्यादीनां सत्त्वगुणानां विकासोऽपि सांख्ययोगदर्शनशिक्षायाः प्रमुखोद्देश्यानि भवन्ति।
- अन्यभारतीयदर्शनवत् सांख्य-योगदर्शनानुसारम् अपि मानवजीवनस्य प्रधानोद्देश्यम् आध्यात्मिकमुक्तिरेव वर्तते।
- सांख्ययोगदर्शनयोः गुणतत्त्वानि अखिलजगतः तथा च मानवव्यवहारस्य मूलाधाररूपेण प्रतिष्ठितानि सन्ति।
- सत्त्वगुणस्य प्राबल्येन ज्ञानवृद्धिः, शुद्धता, प्रसादः च भवति; रजोगुणस्य प्रभावेन प्रवृत्तिः, स्पर्धा, चञ्चलता च जायते; तमोगुणस्य आधिक्येन अज्ञानं, प्रमादः, प्रतिबन्धकता, आलस्यं च उत्पद्यते - इति उभयोः दर्शनयोः सम्यक् निरूपणं दृश्यते ।
- सांख्यदर्शने गुणाः बन्धनस्य कारणरूपेण विवेचिताः, योगदर्शने तु तेषां गुणानाम् अतिक्रमणमेव मोक्षसाधनं निर्दिष्टम् ।
- योगाभ्यासेन यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिभिः गुणानां संतुलनं क्रमशः अतिक्रमणं सम्भवति ।
- गुणतत्त्वविमर्शः न केवलं दार्शनिकचिन्तनस्य विषयः, अपि तु नैतिकजीवनस्य, मानसिकस्वास्थ्यस्य, आध्यात्मिकविकासस्य च मार्गदर्शकः भवति ।
- सांख्य-योगदर्शनयोः अनुसारं त्रिगुणात्मकमूलप्रकृतिः अखिल-जगतः कारणभूता वर्तते। सत्त्व-रजस्-तमांसि गुणतत्त्वानि प्रकृतेः स्वभावभूतानि भवन्ति , येषां वैषम्येन जगत्प्रवृत्तिः तथा मानवव्यवहारः नियन्त्र्यते ।
- सांख्यदर्शने गुणाः बन्धनकारकत्वेन प्रतिपादिताः , यतः पुरुषः गुणसङ्गात् संसारबन्धनं प्राप्नोति; पुरुषस्य तु स्वरूपतः गुणातीतत्वं साक्षिरूपत्वं माध्यस्थ्यं द्रष्टृत्वं च प्रतिपाद्यते।
- योगदर्शने गुणतत्त्वानि चित्तवृत्तिनिरोधस्य व्यावहारिको-पायभूतानि भवन्ति। गुणानां वैषम्येन चित्तस्य विक्षेपः, समत्वेन चित्तप्रसादः, तथा गुणातीतावस्थायां कैवल्यसिद्धिः साध्यते ।
- गुणतत्त्वविमर्शः न केवलं दार्शनिकसिद्धान्तपर्यालोचनमात्रं, अपि तु नैतिकजीवनस्य, मानसिकस्वास्थ्यस्य, आत्मनियन्त्रणस्य, आध्यात्मिकविकासस्य च दृढं मार्गदर्शनं प्रददाति ।
- सांख्य-योगदर्शनयोः गुणसिद्धान्तः वर्तमानजीवने अपि अत्यन्तं-प्रासङ्गिकः, यतः एषः व्यक्तित्वविकासाय, जीवनसन्तुलनाय, तथा आत्मसाक्षात्काराय उपयुज्यते ।
- अतः निष्कर्षतया वक्तुं शक्यते यत्, सांख्य-योगदर्शनयोः गुणतत्त्वानां समन्वितो विमर्शः मानवीयजीवनस्य दुःखनि-वृत्तये, आत्मबोधाय, मोक्षप्राप्तये च एकं वैज्ञानिकं, तात्त्विकं तथा सार्वकालिकं दर्शनमार्गं प्रदर्शयति ।

**सन्दर्भग्रन्थसूची -**

१) ईश्वरकृष्णकृता सांख्यकारिका (वङ्गपुस्तकम्); सम्पा- श्री नारायण चन्द्र गोस्वामी; कलिकाता : संस्कृत पुस्तक भाण्डारः १४०६ . ed-3rd .

२) वाचस्पतिमिश्रविरचिता कलिकाता सांख्यतत्त्वकौमुदी(वङ्ग-पुस्तकम्) ; सम्पा-श्री नारायण चन्द्र गोस्वामी; कलिकाता : संस्कृत पुस्तक भाण्डारः १४१८ . ed-5th.

३) विज्ञानभिक्षुविरचितसांख्यप्रवचनभाष्य 'प्रदीप' हिन्दीव्याख्योपेतम् ; सम्पा- डॉ. गजाननशास्त्री मुसलगाँवकरः ; वाराणसी : चौखम्भा संस्कृत संस्थान ; पुनर्मुद्र-२०१९.

४) पातञ्जल योगदर्शनं व्यसभाष्यसमेतो; सम्पा- स्वामी भर्गानन्दः ; कलिकाता : उद्बोधनकार्यालयः ; २००४ . ed-1st .

५) श्रीमद्भागवद्गीता शाङ्करभाष्य, भाष्यकारः अनुवादकश्च-स्वामीवासुदेवानन्दः; कलिकाता : उद्बोधनकार्यालयः १९६८.

६) सांख्यदर्शनम् विद्योदयभाष्यम् ; अनुवादः- आचार्य उदयवीर शास्त्री .

७) सांख्यसूत्रम् अनिरुद्ध वृत्तिसमेतम् ; सम्पा- डॉ. रामशंकर भट्टाचार्यः ; रत्ना पाब्लिकेशन्स .

८) श्वेताश्वतरोपनिषद् ; व्याखा- डॉ.राकेश शास्त्री ; दिल्ली : चौखम्भा ओरियन्टालिया .

**सन्दर्भ**

1. महाभारतम्,१२/३०६/४२-४३
2. सांख्यकारिका- का.३
3. सांख्यकारिका- का.२
4. सांख्यकारिका- का.११
5. श्वेताश्वतरोपनिषद् ४ / ५
6. कूर्मपुराण, २/२/१२-१३
7. सांख्यकारिका- का.१२
8. सांख्यकारिका- का.१३
9. सांख्यकारिका- का. २२
10. सांख्यकारिका- का.१६
11. श्रीमद्भागवद्गीता- २/५०
12. योगदर्शनम् १/१
13. योगदर्शनम् १/२
14. तदेव-२९ (साधनपादः)।
15. योगदर्शनम् (सम्पा. स्वामी भर्गानन्दः), पत्राङ्कः-४।
16. योगदर्शनम् व्यासभाष्य, पृ. ४
17. तत्रैव।
18. पातञ्जल योगदर्शनम् व्यासभाष्य, पृ. १०
19. पातञ्जल योगदर्शनम् १/ ६
20. पातञ्जल योगदर्शनम् १/१०
21. तत्रैव।
22. व्यासभाष्य, पृ. १८